# divyadeshama NgalAshAsanashlokAH

# દિવ્યદેશમઙ્ગલાશાસનશ્લોકાઃ

## Document Information

Text title : divyadeshamangalashasanashlokah

File name : divyadeshamaNgalAshAsanashlokAH.itx

Category : major_works, vedAnta-deshika, vedanta

Location : doc_z_misc_major_works

Author : vedAntadeshika

Transliterated by : Pallasena Narayanaswami ppnswami at gmail.com

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Source : Stotras of Vedanta Desika

Latest update : October 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# દિવ્યદેશમઙ્ગલાશાસનશ્લોકાઃ

શ્રીઃ

શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

વિધિવિહિતસપર્યાં વીતદોષાનુષઙ્ગાં
ઉપચિતધનધાન્યામુત્સવઃ સ્ત્યાનહર્ષામ્ ।
સ્વયમુપચિનુ નિત્યં રઙ્ગધામન્ સ્વરક્ષાં
શમિતવિમતપક્ષાં શાશ્વતીં રઙ્ગલક્ષ્મીમ્ ॥

- શ્રી સારસારમ્ - ( શ્રીરઙ્ગમ્ )

પ્રશમિતકલિદોષાં પ્રાજ્યભોગાનુબન્ધાં
સમુદિતગુણજાતાં સમ્યગાચારયુક્તામ્ ।
શ્રિતજનબહુમાન્યાં શ્રેયસીં વેઙ્કટાદ્રૌ
શ્રિયમુપચિનુ નિત્યં શ્રીનિવાસ ત્વમેવ ॥

- શ્રી રહસ્યનવનીતમ્ - (વેઙ્કટાદ્રિઃ)

વરદ વિરચય ત્વં વારિતાશેષદોષાં
પુનરુપચિતપુણ્યાં ભૂષિતાં પુણ્યકોટ્યા ।
સિતમુદિતમનોભિસ્તાવકૈર્નિત્યસેવ્યાં
હતરિપુજનયોગાં હસ્તિધામ્નસ્સમૃદ્ધિમ્ ॥

- શ્રી તત્ત્વનવનીતમ્ - ( કાઞ્ચીપુરમ્ )

નવનવબહુભોગાં નાથ નારાયણ ત્વં
વિરચય દુરિતૌઘૈસ્તામનાઘ્રાતગન્ધામ્ ।
સહજસુલભદાસ્યૈસ્સદ્ભિરભ્યર્થનીયાં
યતિપરિબૃઢહૃદ્યાં યાદવાદ્રેસ્સમૃદ્ધિમ્ ॥

- (તિરુનારાયણપુરમ્ )

શ્રીરઙ્ગહસ્તિગિરિવૃષાદ્રિપૂર્વકેષુ
સ્થાનેષુ સ્થિરવિભવા ભવત્સપર્યા ।
આકલ્પં વરદ વિધૂતવૈરિપક્ષા
ભૂયસ્યા ભવદનુકમ્પયૈવ ભૂયાત્ ॥

- (શ્રી રહસ્યપદવી)

ઇતિ શ્રીમન્નિગમાન્તમહાદેશિકવિરચિતાઃ
દિવ્યદેશમઙ્ગલાશાસનશ્લોકાઃ ।

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*divyadeshama NgalAshAsanashlokAH*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*